# Shri Dakshayani Stotram

# શ્રીદાક્ષાયણીસ્તોત્રમ્

## Document Information

Text title : Shri Dakshayani Stotram 08 11

File name : dAkShAyaNIstotram.itx

Category : devii, devI, stotra, durgA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-11

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

Shri Dakshayani Stotram

# શ્રીદાક્ષાયણીસ્તોત્રમ્

ગમ્ભીરાવર્તનાભિર્મૃગમદતિલકા વામબિમ્બાધરોષ્ઠી
   શ્રીકાન્તા કાઞ્ચિદામ્ના પરિવૃતજઘના કોકિલાલાપવાણી ।
કૌમારી કમ્બુકણ્ઠી પ્રહસિતવદના ધૂર્જટિપ્રાણકાન્તા
   રમ્ભોરૂઃ સિંહમધ્યા હિમગિરિતનયા શામ્ભવી નઃ પુનાતુ ॥ ૧॥

દદ્યાત્ કલ્મષહારિણી શિવતનુઃ પાશાઙ્કુશાલઙ્કૃતા
   શર્વાણી શશિસૂર્યવહ્નિનયના કુન્દાગ્રદન્તોજ્જ્વલા ।
કારુણ્યામૃતપૂર્ણવાગ્વિલસિતા મત્તેભકુમ્ભસ્તની
   લોલાક્ષી ભવબન્ધમોક્ષણકરી નિશ્રેયસં સન્તતમ્ ॥ ૨॥

મધ્યેસુધાબ્ધિ મણિમણ્ટપરત્નવેદ્યાં
   સિંહાસનોપરિગતાં પરિપીતવર્ણામ્ ।
પીતામ્બરાભરણમાલ્યવિચિત્રગાત્રીં
   દેવીં ભજામિ દૃઢબુધ્દ્ધતલેડજિહ્વાં (?) ॥ ૩॥

સન્નદ્ધાં વિવિધાયુધૈઃ પરિવૃતામાલીકુમારીગણૈઃ
ધ્યાયેદીપ્સિતદાયિનીં ત્રિનયનાં સિંહાધિરૂઢાં સિતામ્ ।
શઙ્ખં ચક્રધનૂંષિ ચારુ(ચક્રમથો ધનુશ્ચ) દધતીં
બિભ્રા(દિવ્યા) યુધાં તર્જનીં
વામે શક્તિમસિં મહેષુભિતરે શ્રીશક્તિશૂલં ભજે ॥ ૪॥

કિંશુકચ્છદવિશાલલોચનીં કિઞ્ચ નાગરસવલ્લિસંયુતામ્ ।
અઙ્ગચમ્પકસમાનવર્ણિનીં શઙ્કરપ્રિયસતીં નમામ્યહમ્ ॥ ૫॥

આરુહ્ય સિંહમસિચર્મરથાઙ્ગશઙ્ખ-
   શક્તિત્રિશૂલશરચાપધરા પુરસ્તાત્ ।
ગચ્છ ત્વમમ્બ દુરિતે પથિ દુષ્ટસત્ત્વાત્
   સંરક્ષણાય સતતં મમ દેવિ દુર્ગે ॥ ૬॥

દિનકરશશિનેત્રે દિવ્યતે (દેવ્યુમે) રુદ્રગાત્રે
ઘનસમુચિતગાત્રે કલ્પવલ્લીસવિત્રિ ।
અનવરતપવિત્રે હ્યમ્બિકે કાલરાત્રે
મુનિવિનુતચરિત્રે મોહને શૈલપુત્રિ ॥ ૭॥

જલરુહસમપાણે સત્કલાબાણતૂણે
સુલલિતમુખવીણે સર્વવિદ્યાપ્રવીણે ।
અલઘુનુતપુરાણે હ્યર્થભાષાધુરીણે-
પ્યલિસમુદયવેણિ ગ્રાવજે શમ્ભુરાજ્ઞિ ॥ ૮॥

વિવિધગુણકરાલી વિશ્વતત્ત્વાવરાલી
શિવહૃદયસમેલી સ્વયભવામથાલી (?) ।
નવમણિમયમૌલી નાગરક્ષોવિભાલી
ધવલભસિતધૂલીધારિણી ભદ્રકાલી (?) ॥ ૯॥

જનનમરણહારી સર્વલોકોપકારી
જનનજતવિહારી ચારુવક્ષોરુહારી (?) ।
કનકગિરિવિહારી કાલગર્વોપહારી
ઘનફણધરહારી કાલિ કૌમારિ ગૌરિ (?) ॥ ૧૦॥

મલહરુનિમતઙ્ગી મન્ત્રયન્ત્રપ્રસઙ્ગી
વલયિતસુભુજઙ્ગી વાઙ્મયી મૌનસઙ્ગી (?) ।
વિલયભયવિહઙ્ગી વિશ્વતો રક્ષપાઙ્ગી
કલિતજયતુરઙ્ગી ખણ્ડચન્દ્રોત્તમાઙ્ગી (?) ॥ ૧૧॥

અમ્બ ત્વદારાધનતત્પરાણાં
મુખારવિન્દે સરસં કવિત્વમ્ ।
કરારવિન્દે વરકલ્પવલ્લી
પદારવિન્દે નૃપમૌલિરાજિઃ ॥ ૧૨॥

પુરવૈરિધાત્રિ મુરવૈરિપૂજિતે
જલદાલિવેણિ ફલદાયિકે શિવે ।
સદયં સસમ્પદુદયં કુરુષ્વ મે
જગદમ્બ શામ્ભવિ કદમ્બવાસિનિ ॥ ૧૩॥

વિજયવિભવદાત્રી વિશ્વકલ્યાણગાત્રી
મધુકરશુભવેણી મઙ્ગલાપાસવાણી ।

શતમખવિધિગીતા શામ્ભવી લોકમાતા
    કલિરિપુજયઘોટી કામકોટિઃ સહાયા ॥ ૧૪॥

મધુપમહિતમૌર્વી મલ્લિકામઞ્જુલોર્વી-
    ધરપતિવરકન્યા ધર્મભૂતેષુ ધન્યા ।
મણિમયઘનવીણા મઞ્જરીદિવ્યબાણા
    કલિરિપુજયઘોટી કામકોટિઃ સહાયા ॥ ૧૫॥

અમ્બ ત્વદંશોરણુરંશુમાલી
    તવૈવ મન્દસ્મિતબિન્દુરિન્દુઃ ।
યાદૃચ્છિકં સંલ્લપિતં ત્રયી તે
    પુમ્ભાવલીલા પુરુષત્ર યાન્તિ (?) ॥ ૧૬॥

દર્વેદનાનભવનૈઃ પરિદયમાના
    નિર્વેદમેતિ નિતરાં કલના મદીયા ।
પર્વેન્દુસુન્દરમુખિ પ્રણતાનુકમ્પે
    સર્વેશ્વરિ ત્રિપુરસુન્દરિ મે પ્રસીદ ॥ ૧૭॥

યત્પ્રભાપટલપાટલં જગત્ પદ્મરાગમણિમણ્ડપાયતે ।
પાશપાણિ સણિપાણિ ભાવયે ચાપપાણિ શરપાણિ દૈવતમ્ ॥ ૧૮॥

ઐશ્વર્યમષ્ટવિધમષ્ટદિગીશ્વરત્વ-
    મષ્ટાત્મતા ચ ફલમાશ્રયિણામિતીવ ।
મુદ્રાં વહન્ ધનધિયો વટમૂલવાસી
    મોદં તનોતુ મમ મુગ્ધશશાઙ્કચૂડઃ ॥ ૧૯॥

ગેહં નાકતિ ગર્વિતઃ પ્રણમતિ સ્ત્રીસઙ્ગમો મોક્ષતિ
    દ્વેષી મિત્રતિ પાતકં સકતતિ ક્ષમાવલ્લભો દાસતિ ।
મૃત્યુર્વૈદ્યતિ દૂષણં સુગુણતિ ત્વત્પાદસેવનાત્
    ત્વાં વન્દે ભવભીતિભઞ્જનકરીં ગૌરીં ગિરીશપ્રિયે ॥ ૨૦॥

પાતય વા પાતાલે સ્થાપય વા સકલલોકસામ્રાજ્યે ।
માતસ્તવ પદયુગલં નાહં મુઞ્ચામિ નૈવ મુઞ્ચામિ ॥ ૨૧॥

આપદિ કિં કરણીયં સ્મરણીયં ચરણયુગલમમ્બાયાઃ ।
તત્સ્મરણં કિં કુરુતે બ્રહ્માદીનપિ ચ કિઙ્કરીકુરુતે ॥ ૨૨॥

માતર્મે મધુકૈટભઘ્નિ મહિષપ્રાણાપહારોદ્યમે

હેલાનિર્મિતધૂમ્રલોચનવધે હે ચણ્ડમુણ્ડાર્દિનિ ।
નિશ્શેષીકૃતરક્તબીજદનુજે નિત્યે નિશુમ્ભાપહે
શુમ્ભધ્વંસિનિ સંહરાશુ દુરિતં દુર્ગે નમસ્તેઽમ્બિકે ॥ ૨૩॥

રક્તાભામરુણાંશુકામ્બરધરામાનન્દપૂર્ણાનનાં
મુક્તાહારવિભૂષિતાં કુચભરક્લાન્તાં સકાઞ્ચીગુણામ્ ।
દેવીં દિવ્યરસાન્નપાત્રકરકામમ્ભોજદર્વીકરાં
ધ્યાયે શઙ્કરવલ્લભાં ત્રિણયનામમ્બાં સદાનપ્રદામ્ ॥ ૨૪॥

ઉદ્યદ્ભાનુનિભાં દુકૂલવસનાં ક્ષીરોદમધ્યે શુભે
મૂલે કલ્પતરોઃ સ્ફુરન્મણિમયે સિંહાસને સંસ્થિતામ્ ।
બિભ્રાણાં કરયોઃ સુવર્ણચષકં બીજં ચ શાલ્યુદ્ભવં
ભક્તાભીષ્ટવરાભયાઞ્જલિપુટાં ધ્યાયેઽન્નપૂર્ણેશ્વરીમ્ ॥ ૨૫॥

વામે પાયસપૂર્ણહેમકલશં પાણૌ વહન્તી મુદા
ચાન્યે પાણિતલે સુવર્ણરચિતાં દર્વી ચ ભૂષોજ્જ્વલામ્ ।
અમ્બા શુદ્ધદુકૂલચિત્રવસના કારુણ્યપૂર્ણેક્ષણા
શ્યામા કાચન શઙ્કરપ્રિયતમા શાતોદરી દૃશ્યતે ॥ ૨૬॥

કરેણ ચઞ્ચન્મણિકઙ્કણેન
દર્વી દધાનાં ધવલાન્નપૂર્ણામ્ ।
કદાવલોકે કરુણાલવાલાં
કાશીપુરીકલ્પલતાં ભવાનીમ્ ॥ ૨૭॥

યા માણિક્યમનોજ્ઞહારવિભુના (સહિતા) સિન્દૂરભાસાન્વિતા
તારાનાયકશેખરા ત્રિનયના પીનસ્તનોદ્ભાસિતા ।
બન્ધૂકપ્રસવારુણામ્બરધરા માર્તાણ્ડકોટ્યુજ્જ્વલા
સા દદ્યાદ્ભુવનેશ્વરી ભગવતી શ્રેયાંસિ ભૂયાંસિ નઃ ॥ ૨૮॥

માણિક્યનૂપુરવિભૂષિતપાદપદ્માં
હસ્તારવિન્દકરુણારસપૂર્ણદર્વીમ્ ।
સન્ધ્યારુણાંશુકધરાં નવચન્દ્રચૂડાં
મન્દસ્મિતાં ગિરિસુતે ભવતીં ભજામિ ॥ ૨૯॥

ઇતિ શ્રીદાક્ષાયણીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

*Shri Dakshayani Stotram*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*